॥ श्रीगणपति स्तोत्रराज ॥



गणेश पुराण, उपासनाखण्ड अध्याय 13 में ब्रह्मा, विष्णु और शिव द्वारा गणेश की स्तुति किये जाने का उल्लेख मिलता है जिसमें गणेश के निर्गुण-निराकार स्वरुप का वर्णन है। इस स्तोत्र को स्तोत्रराज की संज्ञा दी गई है। इसे सर्वसिद्धिदायक स्तोत्र माना गया है।

जो बुद्धिमान प्रातःकाल उठकर भक्तियुक्त पवित्र होकर इसका पाठ करता है वह पुत्र, लक्ष्मी और सब कामों को प्राप्त करता है और अंतकाल में ब्रह्मस्वरूप हो जाता है।

श्री गणेशाय नमः ॥

ब्रह्मविष्णुमहेश्वरा ऊचुः।

अजं निर्विकल्पं निराकारमेकं

निरानन्दमद्वैतमानन्दपूर्णम् ।

परं निर्गुणं निर्विशेषं निरीहं परब्रह्मरूपं गणेशं भजेम ॥ १॥

गुणातीतमाद्यं चिदानन्दरूपं चिदाभासकं
सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं परब्रह्मरूपं गणेशं
भजेम ॥ २॥

जगत्कारणं कारणाज्ञानरूपं सुरादिं सुखादिं
युगादिं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं परब्रह्मरूपं गणेशं
भजेम ॥ ३॥

रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं सदा कार्यसक्तं
हृदाऽचिन्त्यरूपम् ।

जगत्कारकं सर्वविद्यानिधानं परब्रह्मरूपं

गणेशं नताः स्मः ॥ ४॥

सदा सत्त्वयोगं मुदा क्रीडमानं सुरारीन् हरन्तं

जगत्पालयन्तम् ।

अनेकावतारं निजाज्ञानहारं सदा विष्णुरूपं

गणेशं नमामः ॥ ५॥

तमोयोगिनं रुद्ररूपं त्रिनेत्रं जगद्धारकं तारकं

ज्ञानहेतुम् ।

अनेकागमैः स्वं जनं बोधयन्तं सदा शर्वरूपं

गणेशं नमामः ॥ ६॥

तमःस्तोमहारं जनाज्ञानहारं त्रयीवेदसारं परब्रह्मपारम् ।
मुनिज्ञानकारं विदूरे विकारं सदा ब्रह्मरूपं गणेशं नमामः ॥ ७॥

निजैरौषधीस्तर्पयन्तं करोघैः सुरौघान्कलाभिः सुधास्राविणीभिः ।
दिनेशांशु सन्तापहारं द्विजेशं शशाङ्कस्वरूपं गणेशं नमामः ॥ ८॥

प्रकाशस्वरूपं नभोवायुरूपं विकारादिहेतुं कलाकालभूतम् ।

अनेकक्रियानेक शक्तिस्वरूपं सदा शक्तिरूपं

गणेशं नमामः ॥ ९॥

प्रधानस्वरूपं महतत्वरूपं धरावारिरूपं

दिगीशादिरूपम् ।

असत्सत्स्वरूपं जगद्धेतुभूपं सदा विश्वरूपं

गणेशं नमामः ॥ १०॥

त्वदीये मनः स्थापयेदङ्घ्रियुग्मे जनो

विघ्नसङ्घान्न पीडां लभेत ।

लसत्सूर्यबिम्बे विशाले स्थितेऽयं जनो ध्वान्त

पीडां कथं वा लभेत ॥ ११॥

वयं भ्रामिताः सर्वथाऽज्ञानयोगादलब्ध्वा
तवाङ्घ्रिं बहून्वर्षपूगान् ।
इदानीमवाप्तास्तवैव प्रसादात् प्रपन्नान् सदा
पाहि विश्वम्भराद्य ॥ १२॥

ब्रह्मोवाच

एवं स्तुतो गणेशस्तु सन्तुष्टोऽभून्महामुने ।
कृपया परयोपेतोऽभिधातुं तान् प्रचक्रमे ॥
१३॥

Essence Of Astrology
- By Lokesh Agrawal
http://essenceofastro.blogspot.com/
https://www.facebook.com/essenceofastro